International Journal of Sanskrit Research 2023; 9(6): 230-233

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(6): 230-233
© 2023 IJSR
www.anantaajournal.com
Received: 22-10-2023
Accepted: 26-11-2023

**Soumini KR**
Research Scholar,
Department of Sanskrit General,
SSUS Kalady, Kerala, India

**Corresponding Author:**
**Soumini KR**
Research Scholar,
Department of Sanskrit General,
SSUS Kalady, Kerala, India

# अभिराजराजेन्द्रमहोदयस्य नाट्यनवग्रहम्- समीक्षणम्

**Soumini KR**

## प्रस्तावना

### संस्कृतसाहित्यविधासु रूपकम्

प्राचीनसाहित्यपरम्परानुसारं दृश्य-श्रव्यभेदेन द्विविधस्य काव्यस्य दृश्यकाव्यविभागे अन्तर्भवति नाट्यम्। 'अवस्थानुकृतिर्नाट्यम् ' इति नाट्यशास्त्रे आचार्यो भरतमुनिः। तच्च दृश्यमानावस्थानुकृतिर्नाट्यं रूपकमिति प्रसिद्धम्, यथा दशरूपके -'रूपारोपात्तु रूपकम्'। अर्थात् यत्र नटः कस्यचित् कथापात्रस्य रूपमारोप्य तस्य रूपमिव अभिनयति, तदेव रूपकम्। तद् रूपकं तु अङ्ग- रस- नायकभेदान्यनुसृत्य नाटकम्, प्रहसनम्, वीथिः, अङ्कम्, भाणः..... इत्यादि दशविधमस्ति। एतदतिरिच्य अष्टादश उपरूपकाण्यपि सन्ति। तेषु रूपकभेदेषु नाटकानामेव सर्वकालेषु प्रचुरः प्रचारः। न केवलं रूपकभेदेषु, संस्कृतसाहित्यस्य प्रायः सर्वे साहित्यसृष्टिषु कलासु च नाटकस्य एव प्रथमस्थानं सहृदयमनसि, एवं नाटकं प्रत्येकं प्राधान्यमर्हति। अत एवोक्तं- 'काव्येषु नाटकं रम्यम्' इति, नाटकान्तं कवित्वमिति च। एते उक्ती नाटकस्य प्राधान्यप्रतिफलनरूप एव। अस्मात् ज्ञातुं शक्यते यत्- साहित्यलोके वर्तमानानां कलासृष्टीनां मध्ये नाटकम् अथवा रूपकम् एकः लोकप्रियो विभवः।

### अधुनातनं रूपकम्

संस्कृतसाहित्यमद्यापि दृश्य-श्रव्यकाव्यैः सुसमृद्धं विद्यते। न केवलमन्यभाषासु साहित्यवदपितु कदाचित्तदधिकमेव संस्कृतसाहित्यं प्रतिदिनं विकसनं प्राप्यमाणमिव दृश्यते। बहूनां पण्डितानां मतेषु आधुनिकसंस्कृतसाहित्यस्य आरम्भः क्रैस्तवाब्देः 1784 तमाद् वर्षात्परिगणितुं शक्यते। पण्डितः अभिराजराजेन्द्रमिश्रः आधुनिकसंस्कृतसाहित्यस्य समयं त्रिधा विभक्ति, यथा-

- पुनर्जागिरणकालः (1784- 1884)
- स्थापककालः(1884- 1950)
- समृद्धिकालः(1950- अद्यपर्यन्तम्)

स्वातन्त्रोत्तरकाल एव तन्मतानुसारम् आधुनिकसंस्कृतसाहित्यस्य समृद्धिकालः। एवम् अर्वाचीनसंस्कृतसाहित्यस्य समृद्धिकाले अनेके कृतयः सञ्जाताः सन्ति। सौभाग्यवशाद् अर्वाचीनं संस्कृतसाहित्यं गुणवत्तदृष्ट्या परिमाणदृष्ट्या च अत्यधिकं महत्वमर्हति। अभिनवसर्जनाभावाद् लाटिनादीन्यनेकानीतरभाषासाहित्यानि नामशेषाण्येवाधुना सञ्जातानि।

किन्तु संस्कृतस्य नास्त्येष भाग्यदोषः। नैकासु विधासु संस्कृतसाहित्यमधुनापि कतिपयसमयोचितपरिवर्त्तनेन विलसतितमाम्।

रूपकसाहित्यम् अद्य नाटकनाम्ना एव सुप्रसिद्धम्। संस्कृते लघुनाटकानां नाट्यमित्यभिधानं वर्त्तते। अस्मिन् काले संस्कृतेतरभाषासु च नाटकसाहित्यरचना सुलभैव। संस्कृते त्वियं साहित्यरचना दिनं प्रति वर्धते।

अद्यत्वे नभो- नाट्यानि (radio plays) इति नूतनरूपं नाटकविभागं च प्रसिद्धमस्ति साहित्यलोके। भारतस्वातन्त्रोत्तरकालसंस्कृतरूपकाणि बहुधा भरतमुनिकृत- नाट्यशास्त्रनियमाननुसृत्यैव विरचितानीति वक्तुं शक्यते। साम्प्रतिकसंस्कृतरूपकसाहित्ये नाट्यशास्त्रे भरतमुनिकृत- प्राचीननिबन्धनानि कालानुसृतपरिवर्त्तनेन समं स्वीकृतानि सन्ति आधुनिकरचयितृभिः। अर्थात् प्राचीनरीतेः नूतनरीतेः च मिश्रणमपि अद्यतनरूपकेषु द्रष्टुं शक्यते।

वर्तमानयुगरूपकस्य अन्यत् वैशिष्ट्यम् अस्ति- इतिहासपुराणान्तर्गतं प्रसिद्धम् इतिवृत्तमतिरिच्य समकालीनवृत्तानि स्वीकृत्य निरवधि नाटकानि विरच्यन्त इति। रामायणमहाभारतादि वृत्ताननुसृत्यापि रचनाः सम्भवन्त्येव। किञ्च, केषुचित् अर्वाचीनरूपकेषु परम्परानुसारं नान्दी न विद्यते, तत्रोदाहरणं यथा- अभिराजमिश्रस्य रक्ताभिषेकम्, कन्थामाणिक्यम् इत्यादि। बहुषु आधुनिकनाटकेषु भरतवाक्यमपि नैव दृश्यते। किन्तु एतन्निस्संशयं वक्तुं शक्यते यत् पुराणस्य विरोधे निषेधेन वा न स्थिता नवीनेयं रूपकशाखा इति।

अद्यतन- संस्कृतरूपकसाहित्यस्य एकं प्रधानवैशिष्ट्यम् अस्ति यत् तत्र प्राचीन- परम्परागतरीत्यनुसारमिव पद्यानाम् आधिक्यमपि द्रष्टुं शक्यते। संस्कृतरूपकाणां काश्चन स्वभावसविशेषताः सन्ति- लोकचेतना, सुखान्तता, पात्रोचितभाषा, अनौचित्यसन्दर्भाणाम् अप्रदर्शनम्, रचनाविधानम्, पद्यानाम् आधिक्यम्, प्रकृतिचित्रणम्, अलङ्कारयोजना, कथापात्राणां विविधता, रसपरिपाक इत्यादयः। एतान् स्वभावान् आधुनिककवयः न पूर्णतया तिरस्कुर्वन्ति। आधुनिकरूपकेषु स्वभावविशेषता इमाः क्वचिदधिकं क्वचिन्न्यूनतया च द्रष्टुं शक्नुमः।

वर्तमानयुगे मनुष्याः स्व- स्वकर्मस्वतीव व्यस्ता एव। तत्र बहुभूरिपक्षाणां जनानां मध्ये काश्चित्सुदीर्घकाव्य- नाटक- कथाख्यायिकाः आस्वादयितुं न पर्याप्तः समयः। तदेव एकं प्रमुखं कारणम् आधुनिककाले ललितशैलीयुतानां स्वल्पकायानाम् एकाङ्किरूपकाणां संख्यावर्धनस्य। लघुकृतीनामेव अद्य प्रसक्तिः। ता एव बहुजनप्रियङ्कराः। एवं साम्प्रतिकः कालः एकाङ्किरूपकनिर्माणाय अनुकूलः। अतः एवाद्य लघु- लघूनाम् एकाङ्किरूपकाणां संख्या दिनं प्रति वर्धते।

पारम्परिकरूपकविभागेषु भाण- व्यायोग- वीथी- प्रहसनाङ्का एव एकाङ्कितां भजन्ते। किन्त्वद्यतनानि एकाङ्किरूपकाणि अनया रीत्या विभक्तुं न शक्यते। सामान्यजनानां किमपि विषयस्य अन्तरा अत्यन्तम् आनन्दानुभूतिः तत् दृष्टमात्रेणैव लभ्यते। एवमन्तरानन्दोत्पादकशक्तिरेव आधुनिकरूपकस्यापि निकषम्। इत्थं स्वातन्त्रोत्तरकाले भारते एकाङ्किरूपकाणि साहित्यसृष्टिषु सातिशयं शोभन्तेतमाम्।

## आधुनिकः साहित्यकृत् अभिराजराजेन्द्र

एवं शोभमानासु अत्याधुनिकसाहित्यरत्नेषु नितान्तं जाज्वल्यमानानि सन्ति डा. अभिराजराजेन्द्रमिश्रपादानां लघुरूपकाणि। डा. अभिराजराजेन्द्रमिश्रवर्याः कथाकारकाव्यकृन्नाटककर्तृ- प्रबन्धकारेत्यादिषु बहुषु रूपेषु प्रसिद्धः भवति आधुनिकरचनालोके। काव्यज्ञस्यास्य महनीयमहाकवेः अनेकाः कृतयः सन्ति संस्कृतसाहित्ये। मिश्रमहोदयेन महाकाव्य- गीतिकाव्य- स्फुटकाव्य- शतककाव्य- कथा- नाटकाद्यनेकविधासु उत्कृष्टं साहित्यं सृष्टमस्ति न केवलं संस्कृतेन एवापितु अन्याभिरपि भाषाभिः। उत्तरप्रदेशस्य साहित्यकारेषु प्रथमगणनीयः भवति मिश्रमहोदयः। तस्य कृतिषु अव्यतमं भवति 'नाट्यनवग्रहः' नाम नव लघुनाट्यानां संग्रहरूपो ग्रन्थः।

अभिराजराजेन्द्रमिश्रः क्रिस्ताब्देः 1943 तमे वर्षे जनवरिमासस्य द्वितीये दिने उत्तरप्रदेशे जौनपुरदेशे द्रोणिपुरजनपदे जनिमलभत। तस्य पिता पण्डितदुर्गाप्रसादमिश्रः, माता च श्रीमती अभिराजीदेवी। माता अभिराजीदेव्याः पुत्रः इत्येन 'अभिराजः' इति उपाधिनापि साहित्यलोके प्रसिद्धिमवाप्तो मिश्रमहोदयः। हिन्दीभोजपुर्यग्रेजीजावीभाषासाहित्यलोकेष्वपि तस्य योगादानं तदतिमहनीयम्। संस्कृतभाषायां जानकीजीवितम्, वामनावतारम् इति द्वौ महाकाव्यौ, चतुर्दशखण्डकाव्यानि, षट् नवगीतसंग्रहाः, नव एकाङ्किनाट्यसंग्रहाः, षट् कथासंग्रहाः, चम्पूकाव्यानि, षट् शोधग्रन्थाः च प्रणीताः सन्ति। तथा तेन बहूनि पारितोषिकाणि सम्मानानि च स्वकीयै साहित्यसम्भावनायै अधिगतानि।

## नाट्यनवग्रहम्- परिचय

न केवलं पण्डितानां कृते ग्रन्थाः निर्मीयन्ते आधुनिकरचनाकारैः, अपि तु सामान्यजनानां बालानां च मनसि कृत्वा नवनवीनाः कृतयः आविष्क्रियन्ते। अर्वाचीनसंस्कृतसाहित्यस्य बालसाहित्यमपि विस्तृतमेवास्ति। 'नाट्यनवग्रहम्' नाम इदं नाट्यसङ्कलनमपि बालानां कृते कृतमस्ति ग्रन्थकारेण अभिराजराजेन्द्रमिश्रमहाभागेन। 'नाट्यनवग्रहम्' इति

ग्रन्थनामानुसारमेव अस्मिन् संग्रहे नवनूतनानि नवनाट्यानि विलसन्तितमाम्। प्रत्येकमपि नाट्यं शिशूनां कृते जीवितमूल्यानि बोधयत् गुणपाठान् पाठयत् सदुपदेशान् यच्छदतिसरलया सुगमया च भाषया प्रेरणाः प्रदास्यमानम् अतिमनोरञ्जकं च भवन्नितरां रङ्गोपयोगि राजते। एषां नाट्यानां मञ्चावतरणार्थं नावश्यकः कठिनः परिश्रमः न चावश्यकः महान् सम्भारसङ्ग्रहः। अतिसरलया रीत्या मनोरमया पद्धत्या चाविष्कर्त्तुं योग्यानीमानि नाट्यानि बालानां साकं विद्वज्जनमनोहराण्यपि वर्त्तन्त इति वक्तुमलम्।

## इतिवृत्तम्

ग्रन्थकारः अत्र भागवतपुराणात्, महाभारताद्, रामायणाद् च प्रख्यातमितिवृत्तं स्वीकृतमस्ति। 'सत्यकामजाबालः' नाम नाट्यं वैदिकीं कथातन्तुमवलम्ब्य विनिर्मितः। पञ्चतन्त्रादपि इतिवृत्तं स्वीकृतमस्ति। एतदतिरिच्य कविकल्पितम् उत्पाद्यमितिवृत्तमुपयुज्यापि नाट्यानि विरचितमस्ति।

एवं दृश्यते यन्नवनाट्येषु अष्टानां कथावस्तु इतिहासाद्युपजीव्यम् एकश्च कविकल्पितं भवति। तत्र नाट्यकृता उपजीवितकथावस्तुषु सारतया परिवर्त्तनं न कृतम् अपि तु नाट्यरूपप्रदानेन रङ्गमञ्चयोग्यं रुचिपूर्णं च विहितम्।

## पात्रचित्रणम्

नाट्येषु कथापात्राणि तेषां विनियोगः तच्चरितानां सफलतया चित्रणं च महत्वमर्हन्ति। सूत्रधारसहितं त्रयादारभ्य दशपर्यन्तं कथापात्राणि विद्यन्ते नाट्येषु। पुरुष-स्त्री- जन्तवः च कथापात्ररूपेण अत्र भवन्ति।

## रसनिरूपणम्

नाट्यनवग्रहम् शिशूनुद्दिश्य लिखितमस्ति, तत्कारणादेव अन्यनाटकेष्विव पूर्णतया रसपरिपाकः नैव लभ्यते अत्र तथापि प्रकृतनाट्यानि विविधान् भावान्, इतस्ततः कांश्चिद्रसानामपि छटामाविष्कुर्वन् शोभन्तेतमाम्। एवं पश्यामो यदनेके रसाः भावाश्च नाट्यकृता कौशलेन प्रयुक्ताः किन्तु रचनायाः स्वभाववैशिष्ट्यान्न ते तावन्मात्रं परिपुष्टिं प्राप्नुवन्ति यथा नाटकादौ। किञ्च बालकानुद्दिश्य रचितत्त्वादत्र भूरिशः ईश्वरभक्त्याः, मातृभक्तेः, वात्सल्यस्य, उत्साहस्य, विस्मयस्य, करुणस्य च प्राधान्यं वरीवर्त्ति।

## अलङ्कारविन्यास

लघुनाट्येष्वेतेषु रसानामिव अलङ्काराणामपि न तावन्मात्रं प्रसक्तिर्यथा नाटकादौ। अत्र उपमा, अनुप्रास, दृष्टान्त, काव्यलिंगादि अलङ्काराणां प्रयोगः द्रष्टुं शक्यते। कस्यापि काव्यजातस्य शोभावर्द्धका भवन्ति अलङ्काराः। तत्र नाट्यसंग्रहः अयं नापवादः। किन्तु श्लेषयमकादयः क्लिष्टा अलङ्कारा अत्र परिहृता एव तेषां प्रौढास्वादकोचितत्त्वात्। शिशुजनोचिते नाट्यसंग्रहे शिशुजनोचिता अलङ्कारा एव विन्यस्ता न तु जटिलाज्जतिलतरा इतीदं तथ्यं बालानां कृते ग्रन्थनिर्माणे अपि अभिराजेन्द्रस्य उन्नतं साफल्यं सूचयति।

## वृत्तविनियोग

रूपकेष्वपि श्रव्यकाव्यवद् वृत्तसंयोजनस्य महत्वं वर्त्तते। वृत्तानि रसभावानुरूपाणि स्युरिति भवति प्रायशः कवीनां यत्नः। अत्र सङ्ग्रहे पद्यानि अनतिसङ्ख्याकान्येव। किन्तु यत्र प्रयुक्तानि तत्र सन्दर्भानुरूपं शोभन्ते। अस्मिन् नाट्यसंग्रहे ग्रन्थकारेण परम्परानुसारीणि मात्रिकवर्णिकवृत्तानि अनुष्टुप्, वंशस्थम्, उपेन्द्रवज्रा, मालिनी, शार्दूलविक्रीडितम्, भुजङ्गप्रयातम् च भूरिशः विनियुक्तानि विराजन्ते। किञ्च तदतिरिच्य प्रादेशिकभाषावृत्तान्यपि यथोचितं स्वीकृतानि तत्तत्सन्दर्भेषु चमत्कृतिम् उत्पादयन्ति। सर्वाण्यपि ग्रन्थप्रयुक्तानि वृत्तानि, परम्परागतानि वा स्युः, आधुनिकरीत्यनुसृतानि वा, तत्तत्सन्दर्भानुरूपमेव प्रयुक्तानि सहसा चित्ताकर्षकाणि संग्रहस्यास्य विशेषं वर्धयन्त्येव।

## नाट्ययुक्ती

नाट्यनवग्रहे अत्र लघुकाये अपि नैका नाटकीययुक्तीः प्रयुक्ता दृश्यन्ते। नाट्यानि नान्द्या उच्चारणेनैवारभन्ते। ततः सूत्रधारेण पद्यात्मकः कविपरिचयः अपि दीयते। सर्वेष्वप्येषु नाट्येषु एकैव नान्दी, सम्भवतः बालानां सरलतया कण्ठस्था भवेदित्याशया स्यादिदम्। एवमेव कविपरिचियाय उच्चार्यमाणानि पद्यान्यपि सर्वत्र समानानि। तदनन्तरम् आवश्यकतानुसारं किञ्चित्परिवर्त्तनं कृत्वा नाट्यपरिचयं तुल्येन पद्येन विदधाति सूत्रधारः तदनु मञ्चान्निष्क्रामते च।

अनन्तरं कथापात्राणां यथावत् प्रवेशो भवति।

कानिचन नाट्यानि एकेनैव दृश्येन समाप्तिमुपयान्ति, अन्यानि द्वित्रिषु दृश्येषु विभक्तानि। एतेषु नाट्येषु प्रकाशम्, आत्मगतम् इत्यादीनां कथोपकथनानां प्रयोगमपि यथास्थानमस्ति। व्यङ्ग्यार्थकथनस्य च प्रयोगः कतिपयस्थलेषु दरीदृश्यते।

रङ्गोपयोगिनः अभिनयोचिताः च नाट्यनिर्देशा अपि तत्तत्स्थानेषु दीयन्ते यथा 'जवनिका पतति' इत्यादि।

अत्रैतदपि विशेषेण वक्तव्यं यन्नाट्यनिर्मितौ ग्रन्थकारेण पूर्वाचार्याणां नियमा न सर्वथा पालिताः न चापि पूर्णतया तिरस्कृताः। समयानुसारं नियमेषु परिवर्त्तनानि कृत्वा स्वकीयां नीतिं बुद्धिं च उपयुज्य प्रायोगिकदृष्ट्या निर्मितानि सन्ति नाट्यानमूनि।

प्रायः सर्वेष्वपि एतेषु नाट्येषु मुख्यकथापात्रं किञ्चित् सामाजिकेभ्यः शुभाशंसनं भरतवाक्यं प्रस्तौति।

## उपसंहार

सौभाग्यवशात् अर्वाचीनसंस्कृतसाहित्यं गुणवत्तदृष्ट्या परिमाणदृष्ट्या च प्राचीनसाहित्यवत् सम्पन्नम् अतिविस्तृतं च भवति। दिनं प्रति ग्रन्थाणां संख्या वर्धते। एवं स्थिते साम्प्रतिकसंस्कृतसाहित्यजगति मिश्रेणाभिराजराजेन्द्रेण विस्तृतः साहित्यलोक एव निर्मितः। मिश्रपादेन प्राचीनरीत्याः साकं नूतनाशयानां मिश्रणं कृत्वा एव नाट्यनवग्रहम् नाम रूपकसङ्ग्रहः अयं सृष्टः। सूत्रयदारकृतारम्भः, नान्दी, कथोपकथनादि प्रयोगः इत्यादि नाट्यनियमाः अत्र कविना सम्यक् प्रयुक्ताः। किन्तु नाट्यानि इमानि कस्मिन्नपि प्राचीनरूपकविभागे अन्तर्भवन्तीति पूर्णतया वक्तुं न शक्यते। उपरूपकविभागस्य विभागेषु अपि नान्तर्भवन्ति यतो ह्येतानि रूपकोपरूपकलक्षणानि पूर्णतया नानुसरन्ति। अतः वक्तुं शक्यते यद् मिश्रपादः इमानि एकाङ्किकनाट्यानि स्वमेधाया स्वतन्त्रवृत्तेन चमत्कृतानीति। किञ्च पुस्तकस्यारम्भे एव कविः स्वोपज्ञमेकाङ्किकरूपकाणां लक्षणं श्लोकरूपेण स्वयमुपस्थापयति।

एकाङ्किकनाट्यं भवति इत्येन अङ्कविभजनं न करोति, तत्स्थाने एकाङ्किकनाट्यानाम् अनुरूपं दृश्येषु विभजनं स्वीकरोति। अत्र संकलितानि सर्वाणि नाट्यानि कस्यापि सद्गुणस्य उपदेशं गुणपाठरूपेण ददाति। पाठनावसरे दर्शनावसरे वा विरसताया लेशमात्रमपि नानुभूयते। सन्धीनां सम्मर्दं , समासानां बाहुल्यम्, कठिनाक्षराणां प्रयोगं च पूर्णतया वर्जयति कविरत्र।

एकाङ्कीनां प्रमुखभावानुरूपं शीर्षकं ददाति कविः। नवनाट्यानां संग्रहमित्येन 'नवनाट्यग्रहम्' इति पुस्तकनामैव उचितम् आकर्षणीयं च। एवं प्रतिभाशाल्येः कवेः अस्य 'नवनाट्यग्रहम्' नाम एकाङ्किकसंकलनरूपं लघुपुस्तकं अर्वाचीनसाहित्ये बालसाहित्ये च प्राधान्येन विशिष्टं स्थानं वहति। कथापात्राणां विविधता, यथोचितं स्वाभाविकञ्च रसभावानां प्रयोगः, क्लिष्टभाषाया वर्जनमित्येवम् अस्य नाट्यसंकलनस्य काञ्चन सविशेषताः भवन्ति।

एवं काव्यसृष्टौ पारम्परिकरीत्यां सिद्धहस्तोपि समयानुसारं सहृदयानन्दं सौकर्यं प्रायोगिकत्वं च मनसि निधाय आधुनिकैर्युक्तिभिः ग्रन्थान् रचयत्यसौ। इदं असंशयं वक्तुं शक्यते यत् सङ्ग्रहे अस्मिन् सन्निविष्टं प्रत्येकमपि नाट्यम् अस्माकं सुसंस्कृतेः संस्कृतस्य च परिपोषणाय सिद्ध्यतीति शम्।

## संदर्भसूची


1. नाट्यनवग्रहम्। अभिराजराजेन्द्रमिश्रः। वैजयन्त प्रकाशन, इलहाबाद, 2007
2. अभिराजयशोभूषणम् । अभिराजराजेन्द्रमिश्रः। वैजयन्त प्रकाशन, इलहाबाद, 2006
3. आधुनिकसंस्कृतसाहित्यश्रीः । राधावल्लभः, रमाकान्तपाण्डेयः(सम्पा.)। प्रतिभाप्रकाशनम्, दिल्ली, 2001
4. श्रीधनञ्जयविरचितं दशरूपकम् । डा.केशवराव मुसलगांवकरः (व्याख्याकारः)। चौखम्बा प्रकाशन, वाराणसी, 2009 (4th edition)
5. अर्वाचीनसंस्कृतसाहित्य- दशा एवं दिशा । डा. मञ्जुलता शर्मा(सम्पा.)। परिमल पब्लिकेषन्स, दिल्ली, 2004
6. Prajapati Shweta. A Marigold of Modern Sanskrit Literature. New Bharatiya Book Corporation, Delhi; c2014
7. Raghunathacharya S B (ed). Modern Sanskrit Literature-Tradition and Innovations. Sahitya Academi, New Delhi; c2002.